**ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :**

1) ಇದು ಪ್ರಶ್ನೆ ಸಹಿತಾ ಉತ್ತರ ಪುಸ್ತಕವಾಗಿದೆ.

2) ಪ್ರತಿಪ್ರಶ್ನೆಗೂ ಉತ್ತರ ಬರಯಲು ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೇಯಲ್ಲಿಯೇ ಸ್ಥಳಾವಕಾಶ ಮಾಡಿಕೊಡಲಾಗಿದೆ ಉತ್ತರಗಳನ್ನು ನಿರ್ದಿಷ್ಟಪಡಿಸಿದ ಜಾಗದಲ್ಲಿಯೇ ಬರೆಯಬೇಕು.

3) ಈ ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯ ಹೊಂದಿಸಿ ಬರೆಯಿರಿ ಪ್ರಶ್ನೆಯು ಒಳಗೊಂಡಂತೆ ಒಟ್ಟು 63 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೋಂದಿರುತ್ತದೆ.

4) ಪರೀಕ್ಷಾರ್ಥಿಗಳು ಉತ್ತರಗಳನ್ನು ಪೇನ್ಸಿಲನಿಂದ ಬರೆಯಬಾರದು. ಬರೆದರೆ ಅಂತಹ ಉತ್ತರಗಳನ್ನು ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಪರಿಗಣಿಸಲಾಗುವುದಿಲ್ಲ.

---

**परीक्षार्थिनां सामान्याः सूचना :**

1) **इदं प्रश्नयुक्तम् उत्तरपुस्तकं भवति ।**

2) **प्रत्येकं प्रश्नस्य उत्तरं लेखितुं प्रश्नयुक्ते उत्तरपुस्तके एव पर्याप्तः स्थलावकाशः प्रकल्पितः । निर्दिष्ट स्थानेषु एव उत्तराणि लेखनीयानि ।**

3) **अस्मिन् प्रश्नयुक्ते उत्तरपुस्तके 'संयोज्य लिखत' सह आहत्य त्रयषष्टिः [63] प्रश्नाः भवन्ति ।**

4) **परीक्षार्थिनः उत्तराणि पेन्सिल्द्वारा न लिखेयुः । पेन्सिल्द्वारा लिखितानि उत्तराणि मौल्यमापनार्थं न परिगण्यन्ते ।**

---

**I. सूक्तम् उत्तरं चित्वा क्रमाक्षरेण सह निर्दिष्टस्थाने लिखत ।** **[15 × 1 = 15]**

1. राधाकृष्णन् महोदयः अध्यापकवृत्तिम् अस्मिन् नगरे प्रारभत ——

   (A) मैसूरुनगरे (B) कोलकत्तानगरे

   (C) मद्रासनगरे (D) काशीनगरे

2. यमः नचिकेतसम् इमां विद्याम् उपदिशति ।

   (A) अध्यात्मविद्याम् (B) लौकिकविद्याम्

   (C) आर्थिकविद्याम् (D) सामाजिकविद्याम्

3. 'जीवने' – अत्र एषा विभक्तिः वर्तते ।

   (A) पञ्चमी (B) सप्तमी

   (C) षष्ठी (D) प्रथमा

4. चतुर्विधपुरुषार्थेषु अयम् अन्यतमः ।

(A) लोभः (B) मोहः

(C) धर्मः (D) मदः

5. एते आरोग्यस्य अपहर्तारः ।

(A) रागाः (B) भोगाः

(C) रोगाः (D) योगाः

6. 'कुशली' – अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

(A) कुशलीनि (B) कुशलिनी

(C) कुशला (D) कुशलि

7. विरूपाक्षदेवालयस्य वर्णनम् अस्मिन् काव्ये वर्तते ।

(A) रघुवंशे (B) कुमारसम्भवे

(C) हर्षचरिते (D) मधुराविजये

8. अत्र समूहेतरपदम् इदं भवति ।

(A) तृतीयः (B) चत्वारः

(C) द्वितीयः (D) प्रथमः

9. पर्वतशिखरे एषः निवसति ।

(A) त्रिकालनाथः (B) विश्वनाथः

(C) लोकनाथः (D) जगन्नाथः

10. दरिद्रः अस्य विरुद्धार्थकपदम् इदं भवति ।

(A) मूर्खः (B) निर्धनः

(C) दीनः (D) धनिकः

11. सकलभुवनभारः अस्य मूर्ध्नि स्थापितः।

(A) श्रीरामस्य (B) लक्ष्मणस्य

(C) शत्रुघ्नस्य (D) भरतस्य

12. पुत्रः अस्य समानार्थकपदम् इदं भवति।

(A) सूनुः (B) सूरः

(C) सूतः (D) सूर्यः

13. एषः क्षत्रियावमानी आसीत्।

(A) दुश्शासनः (B) घटोत्कचः

(C) दुर्योधनः (D) धृतराष्ट्रः

14. कालिदासः – कविः, वराहमिहिरः ----------- अत्र चतुर्थं पदम् इदं भवति।

(A) कोषकारः (B) वैद्यः

(C) खगोलविज्ञानी (D) वैयाकरणः

15. मानसं सरः एवं विख्यातम्।

(A) गुरुपीठम् (B) भक्तिपीठम्

(C) शारदापीठम् (D) शक्तिपीठम्

**II. रिक्त स्थानानि पूरयत।** **[5 × 1 = 5]**

16. गङ्गादेवी वीरकम्पणं ................................................ इति वर्णितवती।

17. आत्मानं ................................................ विद्धि।

18. स जातो येन जातेन याति ................................................ समुन्नतिम्।

19. रोगाणां निवारणापेक्षया ................................................ एव वरम्।

20. श्रूयतां जनार्दनस्य ................................................ सन्देशः।

**III.** 21. **संयोज्य लिखत।** **[5 × 1 = 5]**

| A | B | उत्तराणि |
|---|---|---|
| (1) तारापीडः | (a) मार्गदर्शकः | (1) ................................................ |
| (2) ब्रह्मसूत्राणि | (b) अमात्यः | (2) ................................................ |
| (3) प्रो।। होग् | (c) तुण्डीरमण्डलम् | (3) ................................................ |
| (4) चम्पराजः | (d) वेदव्यासः | (4) ................................................ |
| (5) डा. थीबोमहोदयः | (e) वाल्मीकिः | (5) ................................................ |
| | (f) मथुरानगरम् | |
| | (g) जर्मन्पण्डितः | |
| | (h) उज्जयिनी | |

**IV.** **एकवाक्येन उत्तरं लिखत।** **[10 × 1 = 10]**

22. बुक्कराजस्य वंशः कः ?

23. पुलिनं कुत्र प्रदहति ?

24. राधाकृष्णन् महोदयस्य भार्या का ?

25. कस्य इन्द्रियाणि अवश्यानि भवन्ति ?

26. बृहज्जातकस्य रचयिता कः ?

27. चम्पूकाव्यं कयोः सम्मिश्रणम् ?

28. आरोग्यं केषां मूलम् ?

29. राजकुमारस्य राज्यं कैः अपहतम् ?

30. मानवः शान्तिं केन विन्दति ?

31. अभिमन्युः कैः निहतः ?

**V. लघूत्तराणि लिखत।** **[15 × 2 = 30]**

32. अन्ते हरिणः राजानं किमिति उपदिशति ?

33. केभ्यः रोगाः प्रभवन्ति ?

34. घटोत्कचः स्वपरिचयं कथम् अकरोत् ?

35. कं लोकः अनुप्रसीदति ? विवृणुत।

36. मिहिरः 'वराहमिहिरः' इति कथं विख्यातः ?

**अथवा**

अन्तर्जालस्य महत्त्वं किम् ?

37. सन्धिं विभज्य नाम लिखत।

(a) मुनिर्निर्मति –

(b) विनापि –

38. वाक्ये विद्यमानं कृदन्तपदं चित्त्वा प्रत्ययस्य नाम लिखत।

(a) राधा पत्रं लेखितुम् इच्छति।

(b) एधमानं सस्यं पश्य।

39. विग्रहवाक्यं विलिख्य समासनाम लिखत।

(a) उपवृक्षम् –

(b) स्वनगरम् –

40. वाक्यदोषं परिहरत –

(a) नगरस्य बहिः देवालयः अस्ति।

(b) रामः रावणं क्रुध्यति।

41. लकार–पुरुष–वचनानि लिखत।

(a) सन्ति –

(b) पपाठ –

42. तद्धितान्तपदं वियुज्य प्रत्ययस्य नाम लिखत।

(a) निपुणता –

(b) राधेयः –

43. प्रयोगं परिवर्तयत –

(a) मेघाः जलं वर्षन्ति।

(b) योगेन विद्या रक्ष्यते।

44. वाक्ये योजयत –

(a) यथा–तथा –

(b) अद्य –

श्लोकयोः तात्पर्यं कर्नाटकभाषया आङ्ग्लभाषया वा लिखत।

45. यस्तु विज्ञानवान् भवति युक्तेन मनसा सह।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ।।

46. गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति पण्डिताः।
चारैः पश्यन्ति राजानः चक्षुर्भ्या मितरे जनाः ।।

अथवा

विनापि भेषजैर्व्याधिः पथ्येनैव निवर्तते।
न हि पथ्यविहीनानां भेषजानां शतैरपि ।।

**VI. त्रयाणाम् अङ्कानां प्रश्नाः।** **[10 × 3 = 30]**

यथा निर्देशम् उत्तरं लिखत।

47. शरद्घनं नार्दति चातकोऽपि।
कः पाठः ? कः अवदत् ? कम् अवदत् ?

48. किं भवतः प्रत्युपकरोमि ?
कः पाठः ? कः अवदत् ? कम् अवदत् ?

49. पितृनिदेशम् आचर।
कः पाठः ? कः अवदत् ? कम् अवदत् ?

50. सुमुख ! किमेवं क्रियते ?
कः पाठः ? कः अवदत् ? कम् अवदत् ?

कव्योः देश–काल–कृतीनां विषये लिखत।

51. बाणभट्टः

52. कालिदासः

53. वाक्ये विद्यमानम् अलङ्कारं विवृणुत।

कादम्बरी रसज्ञानाम् आहारोऽपि न रोचते।

54. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत।

जितेन्द्रियत्वं विनयस्य कारणम्।

55. संस्कृतभाषया अनुवादं कुरुत।

ವಿದ್ಯಾರ್ಥಿಯು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾನೆ. ಅಲ್ಲಿ ಅವನು ಗುರುವಿನ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸುತ್ತಾನೆ. ಜೀವನದಲ್ಲಿ ಉತ್ತಮ ನಾಗರಿಕನಾಗುತ್ತಾನೆ.

Student goes to the school daily. There he follows the guidelines of the teacher. He becomes a civilized person in his life.

56. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादः कुरुत।

नीलः मेघः आकाशे गर्जति। मेघस्य गर्जनं श्रुत्वा मयूरः नृत्यति। कृषकाः अपि सन्तुष्टाः भवन्ति।

**VII. चतुर्णाम् अङ्कानां प्रश्नाः।** **[5 × 4 = 20]**

श्लोकौ पूरयत –

57. नानाभाषि ..............................................................

...............................................................।

...............................................................

................................................ मामकजननीयम्॥

58. शिक्षा ..............................................................

...............................................................।

...............................................................

.............................................................. तिष्ठति॥

दशवाक्यैः कर्नाटकभाषया आङ्ग्लभाषया संस्कृतभाषया वा उत्तरं लिखत –

59. प्राचीनकालस्य ग्रन्थालयविषये लिखत।

60. नीच–मध्यम–उत्तमजनानां स्वभावः कीदृशः ? विवृणुत।

61. मानससरसः वैशिष्ट्यं विवृणुत।

**अथवा**

गङ्गादेवी किमर्थं मधुराविजयमहाकाव्यम् अरचयत् ?

**VIII. पञ्चानाम् अङ्कानां प्रश्नाः।** **[2 × 5 = 10]**

62. हासननगरस्य सर्वकारीयविद्यालयस्य रविः। रक्षा इति मत्वा दिनद्वयं विरामं संप्रार्थ्य वर्गोपाध्यायं प्रति विरामपत्रं लिखत।

**अथवा**

'हितोपदेशः' इति पुस्तकं प्रेषयितुं निवेद्य देहली नगरस्य गीताप्रकाशनं प्रति आवेदनपत्रं लिखत।

63. प्रबन्धं लिखत।

गणराज्योत्सवः

**अथवा**

स्त्रीशिक्षणम्